# संस्कृत-वार्ता:

दिनाङ्क : 05/12/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी, रशियादेशस्य राष्ट्रपतिः व्लादिमिर पुटिनश्च सुरक्षां, विकासं, परस्परविश्वासञ्च प्रति तयोः सहभागित्व-प्रतिबद्धतां प्रकाशयन्तौ प्रमुखेषु सन्धिपत्रेषु हस्ताक्षरं कृत्वा भारत-रशिया-देशयोः सम्बन्धः सुदृढः अभवदिति उक्तवन्तौ।
- नवदिल्ल्यां भारत-रूस-व्यापार-मञ्चे भारतम् विश्वस्य तृतीया बृहत्तमा अर्थव्यवस्था भवितुं प्रवृत्तः अस्तीति प्रधानमन्त्रिणा मोदिना उक्तम्।
- सर्वकारः वदति यत्, यू. एम्. ई. ई. डी. पोर्टल् इत्यत्र वक्फ्-सम्पत्तयः विलम्बेन पञ्जीकृताः चेत् मासत्रयं यावत् दण्डविधानम् आनुशासनिकं कार्याचरणं वा न भविष्यतीति।
- इण्डिगो-सेवायाः बाधा कारणात् सर्वकारेण डी. जी. सी. ए. विमान--समयसारिणीं स्थगिता।
- आरबीआई प्रमुखः सञ्जय मल्होत्रा इत्यनेन अस्य वित्तवर्षस्य द्विमासिक-मौद्रिक-नीतौ, आर्थिकवृद्धिं वर्धयितुं आर. बी. आई. इत्यनेन अद्य 25 आधार-अङ्कैः 5.25 प्रतिशतं यावत् व्याजदरं न्यूनीकृतमिति घोषितमस्ति।
- एफ्. आई. एच्. हॉकी-पुरुष-कनिष्ठ-विश्वकप्-2025 इत्यस्मिन् अद्य चेन्नै-नगरे प्रागुपान्तचक्रे भारतं बेल्जियम्-देशेन सह क्रीडति।

---

<u>प्रधानमंत्री-पुतिन:</u>

अद्य भारत-रशिया-देशौ रक्षया, व्यापारेण, अर्थव्यवस्थया, स्वास्थ्यसेवया, शिक्षया, संस्कृत्या, प्रसारमाध्यमैः च सम्बद्धेषु अनेकेषु सन्धिपत्रेषु हस्ताक्षरं कृतवन्तौ। नवदिल्ल्यां त्रयोविंशतितमे भारत-रशिया वार्षिक-शिखरसम्मेलने राष्ट्रपतिना व्लादिमिर् पुटिनेन सह संयुक्त- वार्ताहर

सम्मेलनं सम्बोधयता प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् राष्ट्रपतेः पुटिनस्य भ्रमणम् यात्रा समये अभवत् यदा द्वैपाक्षिक-सम्बन्धाः अनेकानि ऐतिहासिक-लक्ष्याणि प्राप्तवन्तः। सः अवदत् यत् गतदशवर्षेषु जगता अनेकानि उत्थानानि पतनानि च दृष्टानि, एतेषु भारत-रशिया-सम्बन्धः सुदृढतया स्थिरः अस्ति। यूरिया-उत्पादने उभौ देशौ निकटतया सहयोगं करिष्यतः इति प्रधानमन्त्री अवोचत्। सः अधोरेखितवान् यत् प्रायः पञ्चविंशतिवर्षेभ्यः प्राक् राष्ट्रपतिः पुटिन्-वर्यः भारत-रशिया-सामरिकसहभागित्वस्य आधारं स्थापितवान्। सः अवदत् यत् आतङ्कवादं विरुध्य कृते युद्धे भारत-रशिया-देशौ सहैव-स्थितौ स्तः। आतङ्कवादं मानवतायाः मूल्यानाम् उपरि प्रत्यक्षाक्रमणम् अस्ति इति भारतस्य अविचलविश्वासं पुनरुद्घाटयन् सः अवदत् यत् आतङ्कवादस्य विरुद्धं वैश्विक-एकता एव बृहत्तमा शक्तिः अस्ति इति।

यूक्रेन्-विषये प्रधानमन्त्री अवदत् यत् भारतं आरम्भात् एव यूक्रेन्-विषये शान्तेः समर्थनं करोति। अस्य विषयस्य शान्तियुतस्य चिरस्थायि -समाधानस्य च कृते कृताः सर्वाः प्रयत्नाः सः स्वीकृतवान्। सः अवदत् यत् भारतं स्वयोगदानार्थं सर्वदा सज्जः अस्ति, भविष्ये अपि तथैव भविष्यति।

प्रधानमन्त्री अवदत् यत् उभौ-पक्षौ यूरेशियन्-आर्थिकसङ्घेन सह मुक्तव्यापार-सन्धिं शीघ्रं समापयितुं कार्यं कुर्वन्तौ स्तः। श्रीमोदी अघोषयत् यत् भारतं शीघ्रमेव रूस-देशस्य नागरिकाणां कृते निःशुल्कं त्रिंशत्-दिनात्मकस्य ई-पर्यटक-वीजा अथ त्रिंशत्-दिनात्मकस्य समूह-पर्यटक-वीजा इति प्रवर्तयिष्यति । सभायाम् उभौ नेतारौ त्रिंशत्यधिक द्विसहस्रतम वर्ष पर्यन्तं भारत-रशिया आर्थिकसहयोगस्य सामरिकक्षेत्राणां विकासाय कार्यक्रमान् स्वीकृतवन्तौ। तौ द्वैपाक्षिकसम्बन्धेषु प्रगतिं समीक्षितवन्तौ, परस्पर-हिताय क्षेत्रीय-वैश्विक-विषयेषु च मतानां आदानप्रदानं कृतवन्तौ।

अस्मिन् अवसरे भारत-रूस-व्यापार-मञ्चे भारतम् विश्वस्य तृतीयं बृहत्तमं अर्थव्यवस्था भवितुं प्रवृत्तः अस्तीति प्रधानमन्त्रिणा मोदिना उक्तम्।

---

## रिजीजू वक्फ सम्पत्तयः

केन्द्रीय-अल्पसंख्य प्रकरणानां मन्त्री किरनरिजीजू इत्ययम् आश्वासितवान् यत्, ये UMEED इति पटलमाध्यमेन वक्फ-सम्पत्तयः पञ्जीकृतवन्तः सन्ति, तान् विरुध्य, अग्रिम मासत्रयं यावत् सर्वकारः किमपि दण्डविधानं न विधाष्यतीति। नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन्, श्रीरिज्जुः अवदत् यत्, प्रक्रियाम् पूर्णां कर्तुं सम्बन्धित-जनैः सम्मुखीकृताः समस्याः उद्धृत्य, संसदः अनेके सदस्याः समुदाय-प्रतिनिधयश्च अतिरिक्तं समयं याचितवन्तः आसन् तदनन्तरं निर्णयः कृतः इति।

---

## नायडु-नागरिक-उड्डयनम्

नागरिक-विमानयान-मन्त्री राममोहन-नायडुः, इण्डिगो-विमानयानानां निरस्तीकरणेन जातविलम्बाच्च उद्भूतायाः अभूतपूर्वां स्थितिं प्रति निरन्तरं निरीक्षणं कर्तुं संबद्धित-मन्त्रालयस्य नियन्त्रण-कक्षं आज्ञापयत्। प्रकरणेस्मिन् संसाधनानां सङ्ग्रहणार्थं, समयोचित-सक्रिय-कार्यम् सुनिश्चितं कर्तुं च निर्देशाः निर्गताः सन्ति।

---

## आर. बी. आई.रेपो दरावचितिः

आरबीआई प्रमुखः सञ्जय मल्होत्रा इत्यनेन अस्य वित्तवर्षस्य द्विमासिक-मौद्रिक-नीतौ, आर्थिकवृद्धिं वर्धयितुं आर्. बि. आई. इत्यनेन अद्य 25 आधार-अङ्कैः 5.25 प्रतिशतं यावत् व्याजदरं न्यूनीकृतमिति घोषितमस्ति। विकासेन गृहनिर्माणं, वाहनचालनं, वाणिज्य-ऋणेत्यादीनि विविधानि अग्रिमाणि ऋणानि सुलभानि भवितुम् अर्हन्ति।

---

## आरएस-एमजी एन. आर. ई. जी. एस.:

महात्मागान्धी-राष्ट्रिय-ग्रामीण-वृत्ति-प्रत्याभूति-योजनान्तर्गतं अद्यावधि वर्तमान-वित्तीयवर्षे राज्येभ्यः केन्द्रशासित-प्रदेशेभ्यश्च त्रिनवत्युत्तर-त्रिशताधिक-षट्षष्टिः कोटिरूप्यकाणां राशिः प्रदत्ता अस्ति। अस्मिन् वेतन-घटकाय सप्तपञ्चाशत् सहस्रकोटिरूप्यकाणि, सामग्र्यै प्रशासनाय च दश सहस्रकोटिरूप्यकाणि सन्ति। ग्रामविकासराज्यमन्त्री कमलेश पासवान: अद्य राज्यसभायां एकस्य प्रश्नस्य लिखिते प्रत्युत्तरे एतत् सूचितवान्। सः अवदत् यत्, योजनान्तर्गतं वेतनप्रदानानि केन्द्रसर्वकारेण प्रत्यक्ष-लाभ-हस्तान्तरणस्य माध्यमेन लाभार्थिनां लेखायां प्रत्यक्षतया निक्षिप्तानि भविष्यन्तीति।

---

**गुजरात-अमित शाहः**

केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः अद्य अवदत् यत् सहकारिता-क्षेत्रस्य व्याप्तिम् विस्तारयितुं सर्वकारः अविरामं कार्यं कुर्वन् अस्ति, तथा च शीघ्रमेव, सहकारिता-आश्वस्तिः इत्यादयः उपक्रमाः सम्पूर्णे देशे प्रवर्तन्ते इति। गान्धीनगरस्य महात्मा-मन्दिरे नाबार्ड् अर्थ् समिट्-2025 इत्यस्य उद्घाटन-सत्रम् अभिसंबोधयन् मन्त्री पुनः उक्तवान् यत् ग्रामीण-अर्थव्यवस्थायाः सुदृढीकरणम् विना विकसित्-भारतस्य स्वप्नम् सम्भवं न भविष्यतीति। सहकार-क्षेत्रस्य वृद्धिः स्वयमेव ग्रामीण-कृषि-विकासं सुनिश्चितं करिष्यति इति सः अवधानं दत्तवान्।

---

**भारत-मलेशिया अभ्यासः**

भारत-मलेशिया-देशौ राजस्थानस्य मरुभूमौ संयुक्त-सैन्य-वर्षा-अभ्यासं-आयोजयतः। अस्य अभ्यासस्य पञ्चमं संस्करणम् अस्य मासस्य अष्टादश दिनाङ्कपर्यन्तं प्रचलिष्यति। अस्य अभ्यासस्य उद्देश्यः संयुक्तराष्ट्रसङ्घस्य आदेशस्य सप्तमस्य अध्यायस्य अन्तर्गतस्य उपपरम्परागतकार्यस्य संयुक्तरूपेण अभ्यासः करणीयः इति अस्ति। अभ्यासस्य परिधौ आतङ्कवाद-प्रतिरोध-कार्येषु संयुक्तप्रतिक्रियासु समन्वयः अन्तर्भवति। उभौ पक्षौ हेलिपैड

इत्यस्य सुरक्षार्थं अभ्यासं करिष्यतः, आतंकवाद-प्रतिरोध-कार्येषु च हताहतानां निष्कासनं कथं करणीयमिति।

---------------------------------------------------------------------------------

<u>हॉकी-पुरूष:</u>

हॉकीति क्रीडायां पञ्चविंशत्यधिक-द्विसहस्रतम वर्षस्य पुरुषाणां कनिष्ठ-विश्व-चषक-स्पर्धायां चेन्नईनगरस्य एग्मोर-क्रीडांगणे भारतीयदलं अद्य प्रागुपान्त्य चक्रीय-द्वन्द्वे बेल्जियमदलं सम्मुखी करिष्यति।

---------------------------------------------------------------------------------

<u>एफ आई एच हॉकी</u>

पञ्चविंशत्यधिक-द्विसहस्रतम वर्षस्य एफआईएच महिलानां कनिष्ठ-हॉकी-विश्व-चषक-स्पर्धायाम् अद्य सायं चिलीदेशस्य सैन्टियागोनगरे अन्तिमपूल इति क्रीडायां भारतीय दलं आयरलैण्ड दलं सम्मुखीकरिष्यति।

।। इति वार्ताः ।।